# Kashisthitam Pashupatakshetramahatmyam

# काशीस्थितं पाशुपतक्षेत्रमाहात्म्यम्

## Document Information

Text title : Kashisthitam Pashupatakshetramahatmyam

File name : kAshIsthitaMpAshupatakShetramAhAtmyam.itx

Category : shiva, shivarahasya, tIrthakShetra

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 10 | vAvRittashlokAH ||

Latest update : March 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2024

*sanskritdocuments.org*

# काशीस्थितं पाशुपतक्षेत्रमाहात्म्यम्

- शिवपार्वतीसंवादे -
श्रीसदाशिव उवाच -
काश्यां पशुपतीशस्य स्थानमत्युत्तमं शुभे ।
नित्यं सन्निहितस्तत्र निवसाम्यहमादरात् ॥ २॥

महापाशुपतैस्तत्र वसतिः क्रियते सदा ।
शैवशास्त्रप्रणेतारः सन्ति तत्रैव कोटिशः ॥ ३॥

भस्मदिग्धकराद्यङ्गाः त्रिपुण्ड्राङ्कितमस्तकाः ।
रुद्राक्षमालाभरणाः दीर्घपिङ्गजटाधराः ॥ ४॥

अघोरमूर्तिमनिशं ध्यायन्ते मामजं शिवम् ।
अघोरमन्त्रविन्यासजपनिष्ठा निराकुलाः ॥ ५॥

निष्कलं निर्गुणं शान्तं शिवमक्षरमव्ययम् ।
तुरीयमनघं मत्वा भजन्ति शिवमेव माम् ॥ ६॥

त्यक्त्वा पशुपतीशस्य स्थानमन्यत्र सर्वदा ।
न गच्छन्त्येव नियताः शैवदीक्षापरायणाः ॥ ७॥

नित्यं शिवकथास्वेव सक्तान्तःकरणा मुदा ।
शिवनाम विहायान्यन्न वदन्त्येव सर्वदा ॥ ८॥

तत्र पाशुपतं नाम कुण्डमस्ति वरानने ।
तत्काश्मीरमणिश्रेष्ठै रचितं निर्मलोदकम् ॥ ९॥

तत्र कुर्वन्ति ये स्नानं भूयस्ते सर्वदा शुभे ।
नारकीं यातनां प्राप्य न शोचन्ति कदाचन ॥ १०॥

तत्र स्नात्वा च पीत्वा च तज्जलं पापनाशकम् ।
सुधार्मिका मणिच्छायासमाक्रान्तमहर्निशम् ॥ ११॥

स्पृष्ट्वाऽपि यान्ति मल्लोकं निर्धूताघा न संशयः ।
पुनरावृत्तिरहितं सर्वाशास्यमनामयम् ॥ १२॥

तस्मिन्नेवाभवत्कुण्डे मण्डूकः कश्चिदुत्तमः ।
स शिवान्नान्यदस्तीति वदंस्तिष्ठति सर्वदा ॥ १३॥

शिवभक्तशरीरं तु चरलिङ्गमतो मया ।
शिवतुष्ट्यर्थमत्रैव पूजा कार्या विशेषतः ॥ २९॥

शिवभक्तशरीराख्ये चरलिङ्गे सदाशिवः ।
नित्यं सन्निहितः साम्बो मोदते भक्तवत्सलः ॥ ३०॥

ततः शैवशरीराख्ये लिङ्गे दत्तं धनं प्रियम् ।
गृह्णाति सादरं शम्भुर्भक्तदेहाश्रयः सदा ॥ ३१॥

धन्याः शैवजनाः सर्वे शिवनामैकजीवनाः ।
यत्पूजया महादेवस्तुष्टो भवति सानुगः ॥ ३२॥

इतोऽप्यन्ये शिवरताः कीटास्तत्कुण्डवासिनः ।
कालेन काश्यामनिशं वसन्तः शिवसम्मताः ॥ ७१॥

शैवं पदमवाप्यान्ते स्थास्यन्ति सुखिनः सदा ।
धर्मसम्पादितेनैव काशीवसेन सर्वदा ॥ ७२॥

काशी पाशुपतं क्षेत्रं महापाशुपताश्रयम् ।
सा पाशुपतवर्याणां मोक्षदा नावसंशयः ॥ ७३॥

शैवाः पाशुपताः शुद्धा यत्र तिष्ठन्ति सर्वदा ।
लिङ्गार्चनावृ(नव्र)ताधीशास्तत्रैव निवसाम्यहम् ॥ ७४॥

मन्नाम जपसंसक्ता मल्लिङ्गार्चनतत्पराः ।
यत्रक्वचन तिष्ठन्ति तत्रसन्निहितोऽस्म्यहम् ॥ ७५॥

शम्भो शङ्कर विश्वेशेत्यनिशं यत्र नृत्यति ।
शैवःशिवरतस्तत्र निवसामि वरानने ॥ ७६॥

यत्र पाशुपता धर्माः शिवधर्माश्च सन्ततम् ।
वसन्ति तत्र सततं निवसाम्यहमादरात् ॥ ७७॥

महापाशुपतं शैवं महाशैवं शिवप्रियम् ।
दृष्ट्वा पूजां यथाशक्ति कर्तव्या सर्वथा जनैः ॥ ७८॥

शैवानपूजयित्वैव यो गच्छत्यभिमानतः ।
स याति नरकं घोरं सत्यमेवोच्यते मया ॥ ७९॥

शिवदीक्षापरैः(रः)शैवः अशैवेभ्यः कदाचन ।
नमस्कारो न कर्तव्यो यतः शैवा जनोत्तमाः ॥ ८०॥

शैवैरन्योन्यपूजा तु कर्तव्या विधिवत्सदा ।
अन्योन्यं पूजकाः पूज्यास्ते भवन्त्यनघाः शुभे ॥ ८१॥

न काशीसदृशं क्षेत्रं न शङ्करसमः सुरः ।
न शैवसदृशो विप्रो न मत्तोऽन्योऽपि मोक्षदः ॥ ८२॥

श्रीमत्पशुपतीशस्य सन्निधौ पत्रिणोऽपि माम् ।
ज्ञात्वा शिव शिवेत्येवं वदन्त्यनिशमादरात् ॥ ८३॥

धन्यं पाशुपतं स्थानं धन्याः पाशुपता जनाः ।
धन्याः पशुपतीशस्य पूजकाः सर्वदा मुदा ॥ ८४॥

यस्मिन्पाशुपतस्थाने वसतां पत्रिणामपि ।
शिवतत्त्वमतिः शुद्धा वर्तते बुद्धिदुर्लभा ॥ ८५॥

काश्यां पशुपतीशस्य सन्निधाने स्थितिः सदा ।
पूर्वोक्तधर्मनिरतैः कर्तव्या यत्नतः शुभे ॥ ८६॥

निराहारव्रतैः शुद्धैर्महाशैवैः शिवार्चकैः ।
स्थेयं पशुपतीशस्य क्षेत्रे यत्नेन सर्वदा ॥ ८७॥

तत्र जप्तो महामन्त्रः शैव शीघ्रफलप्रदः ।
भवत्येव न सन्देहो जपनीयः प्रयत्नतः ॥ ८८॥

शैवदीक्षां(क्षा) शुभां(भा)तत्र शैवेभ्यो दीयते मया ।
ततः पञ्चाक्षरो मन्त्रस्तत्र जप्यो निरन्तरम् ॥ ८९॥

॥ इति शिवरहस्यान्तर्गते काशीस्थितं पाशुपतक्षेत्रमाहात्म्यं सम्पूर्णम् ॥

- ॥ श्रीशिवरहस्यम् । उग्राख्यः सप्तमांशः । अध्यायः १० । वावृत्तश्लोकाः ॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 10 . vAvRRittashlokAH ..

Notes:
Śiva शिव narrates to Pārvatī पार्वती about the Pāśupatakṣetra पाशुपतक्षेत्र located in Kāśī काशी and the merits of worshiping Him as Pāśupatī पशुपति while being able to live there - not just the humans, but also insects, birds, animals etc.
Kaśī काशी harbors several ŚivaTīrthaKṣetra शिवतीर्थक्षेत्र that are outlined in ŚivaRahasyam saptāṃśaḥ शिवरहस्यं सप्तांशः.

Proofread by Ruma Dewan

---

*Kashisthitam Pashupatakshetramahatmyam*
pdf was typeset on March 8, 2024

Please send corrections to *sanskrit@cheerful.com*